वराह उवाच ।

शृणु माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्तमम् ।
यथा वदन्ति वै सूर्य्यं सन्ध्यां पूर्व्वं चिरां तथा ॥
जलाञ्जलिं गृहीत्वा च मम भक्त्या व्यवस्थितः ।
मुहूर्त्तं ध्यानमास्थाय इमं मन्त्रमुदाहरेत् ॥

मन्त्रः । भवोद्भवमादिं व्यक्तमव्ययमादित्यं सर्व्वे देवा ब्रह्मरुद्रेन्द्रास्ताश्च कृष्णो यथासीत् ध्यानयोगस्थिता ते सन्ध्या संज्ञा वासुदेवं नमन्ति वयं देवमादि व्यक्तरूपं कृत्वा चात्मनि देवसंस्था तथापि संसारार्थं कर्म्म तत्कारणमेव सन्ध्या संस्था वासुदेव नमो नमः ।

अनेनैव तु मन्त्रेण सन्ध्यां कुर्य्यात्तु दीक्षितः ॥”

इति वाराहे चतुर्व्वर्णदीक्षानामाध्यायः ॥*॥

सन्ध्याप्रशंसा यथा,—

मुनय ऊचुः ।

“कथं मुने दिवं याति ब्राह्मणो दग्धकिल्विषः ।
अनग्निको हि मे ब्रूहि यदुक्तं वह्निना पुरा ॥

सूत उवाच ।

सायं प्रातश्च यः सन्ध्यामुपास्तेऽस्कन्नमानसः ।
जपन् हि पावनीं देवीं गायत्रीं वेदमातरम् ॥
तपसा भावितो देव्या ब्राह्मणः पूतकिल्विषः ।
न सीदेत् प्रतिगृह्णानो अपि पृथ्वीं ससागराम् ॥
ये चान्ये दारुणाः केचित् ग्रहाः सूर्य्यादयो दिवि ।
ते चास्य सौम्यतां यान्ति शिवाः शिवतरास्तथा ॥
यत्र तत्र गतं चैनं दारुणाः पिशिताशनाः ।
घोररूपा महाकायाः प्रभवन्ति न राक्षसाः ॥”

इति वह्निपुराणे आश्वमेधिकनामाध्यायः ॥*॥

अपि च ।

“नित्यं नित्यं त्रिसन्ध्याञ्च करिष्यसि दिने दिने ।
मध्याह्ने चापि सायाह्ने प्रातरेव शुचिः सदा ॥
सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।
यदह्ना कुरुते कर्म्म न तस्य फलभाग्भवेत् ॥
नोपतिष्ठति यः पूर्व्वां नोपास्ते यस्तु पश्चिमाम् ।
स शूद्रवद्बहिः कार्य्यः सर्व्वस्मात् द्विजकर्म्मणः ॥
यावज्जीवनपर्य्यन्तं यस्त्रिसन्ध्यं करोति च ।
स च सूर्य्यसमो विप्रस्तेजसा तपसा सदा ॥
तत्पादपद्मरजसा सद्यःपूता वसुन्धरा ।
जीवन्मुक्तः स तेजस्वी सन्ध्यापूतो हि यो द्विजः ॥
तीर्थानि च पवित्राणि तस्य संस्पर्शमात्रतः ।
ततः पापानि यान्त्येव वैनतेयादिवोरगाः ॥
न गृह्णन्ति सुरास्तेषां पितरः पिण्डतर्पणम् ।
स्वेच्छया च द्विजातिश्च त्रिसन्ध्यरहितस्य च ॥
विष्णुमन्त्रविहीनश्च त्रिसन्ध्यरहितो द्विजः ।
एकादशीविहीनश्च विषहीनो यथोरगः ॥”

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥

अन्यत् कौर्म्मे १७ अध्याये गारुडे २१५।२२० अध्याययोर्द्रष्टव्यम् ॥*॥ जननमरणाशौचे तन्निषेधो यथा,—

“सन्ध्यां पञ्चमहायज्ञं नैत्यिकं स्मृतिकर्म्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥”

इति शुद्धितत्त्वम् ॥*॥

सायंसन्ध्यानिषेधकालो यथा । कर्म्मोपदेशिन्यां व्यासः ।

“संक्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे ।
सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत् ॥”

इति तिथ्यादितत्त्वम् ॥ * ॥

तत्काले शयनादिनिषेधो यथा,—

“स्वप्नमध्ययनं स्नानमुद्वर्त्तं भोजनं गतिः ।
उभयोः सन्ध्ययोर्नित्यं मध्याह्ने चैव वर्ज्जयेत् ॥”

इति कौर्म्मे १५ अध्यायः ॥

नदीविशेषः । युगसन्धिः । इति मेदिनी ॥ चिन्ता । संश्रवः । सीमा । सन्धानम् । कुसुमविशेषः । इति हेमचन्द्रः ॥

सन्ध्यांशः, पुं, (सन्ध्याया अंशः ।) युगसन्धिः । यथा,—

“चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम् ।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु ।
एकापायेन वर्त्तन्ते सहस्राणि शतानि च ॥”

इति मानवे । १ । ६९-७० ॥

चत्वार्य्याहुरिति । चत्वारि वर्षसहस्राणि कृतयुगं कालं मन्वादयो वदन्ति तस्य तावद्वर्षशतानि सन्ध्या सन्ध्यांशश्च भवति युगस्य पूर्व्वा सन्ध्या उत्तरश्च सन्ध्यांशः । तदुक्तं विष्णुपुराणे ।

“तत्प्रमाणैः शतैः सन्ध्या पूर्व्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि यः ॥
सन्ध्यासन्ध्यांशयोरन्तर्यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः ॥”

वर्षसंख्या चेयं दिव्यमानेन तस्यैवानन्तरप्रकृतत्वात ।

“दिव्यैर्व्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम् ।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे ॥”

इति विष्णुपुराणवचनाच्च ।

इतरेष्विति अन्येषु त्रेताद्वापरकलियुगेषु सन्ध्यासन्ध्यांशसहितेषु एकहान्या सहस्राणि शतानि च भवन्ति । तेनेदं सम्पद्यते । त्रीणि वर्षसहस्राणि त्रेतायुगं तस्य त्रीणि वर्षशतानि सन्ध्या सन्ध्यांशश्च । एवं द्वे वर्षसहस्रे द्वापरः तस्य द्वे वर्षशते सन्ध्या सन्ध्यांशश्च । एवं वर्षसहस्रं कलिः । तस्यैकवर्षशतं सन्ध्या सन्ध्यांशश्च । इति कुल्लूकभट्टः ॥

सन्ध्याचलः, पुं, (सन्ध्याया अचलः ।) पर्व्वतविशेषः यथा,—

“आराधनोपदेशाय कापोतस्य वचः स्मरन् ।
जग्मतुर्दक्षिणां काष्ठां यत्र सन्ध्याचलः स्थितः ॥
कान्ता नाम नदी तत्र वशिष्ठेनावतारिता ।
तस्यास्तीरे महाशैले स्निग्धच्छाया लता तदा ।
सन्ध्यां वशिष्ठः कृतवान् तत्र यस्माद्विधेः सुतः ।
अतः सन्ध्याचलं नाम तस्य गायन्ति देवताः ॥”

इति कालिकापुराणे ५० अध्यायः ॥ * ॥

अपि च ।

“शोभकाख्यान्महाशैलादैशान्यां पर्व्वतोत्तमः ।
तुङ्गः सन्ध्याचलो नाम वशिष्ठो यत्र शप्तवान् ॥
निमिर्नाम्ना तु राजर्षिः शापाद्ब्रह्मसुतः पुरा ।
वशिष्ठो ह्यशरीरोऽभूत्तच्छापाच्च निमिस्तथा ॥
ततो ब्रह्मोपदेशेन निर्जने कामरूपके ।
सन्ध्याचले तपस्तेपे तस्य विष्णुरभूत्तदा ॥
प्रत्यक्षस्तस्य देवस्य वरदानान्महामुनिः ।
अमृतान्यवतार्य्यैर्थं कुण्डं कृत्वा गिरिस्तटे ॥
तत्र स्नात्वा च पीत्वा च शरीरं प्राप पूरितम् ।
तस्मादमृतकुण्डात्तु सन्ध्या नाम नदीवरा ।
निःसृता तत्र चाप्लुत्य चिरायुरगदो भवेत् ॥”

इति च कालिकापुराणे ८१ अध्यायः ॥

सन्ध्यानाटी, [न्] पुं, (सन्ध्यायां नटतीति । नट + इनिः ।) शिवः । इति शब्दरत्नावलीत्रिकाण्डशेषौ ॥

सन्ध्यापुष्पी, स्त्री, (सन्ध्यायां पुष्पं यस्याः । ङीष् ।) जाती । इति राजनिर्घण्टः ॥

सन्ध्याबलः, पुं, (सन्ध्यायां बलं यस्य ।) राक्षसः । इति त्रिकाण्डशेषः ॥

सन्ध्याबलिः, पुं, शिवालयस्थितमृत्काष्ठादिनिर्म्मितवृषः । यथा,—

“ये शिवायतनोत्सृष्टास्ते सन्ध्याबलयो वृषाः ।”

इति हारावली ॥

सन्ध्याभ्रं क्ली, (सन्ध्याया अभ्रमिव तद्वर्णत्वात् ।) सुवर्णगैरिकम् । इति राजनिर्घण्टः ॥ (सन्ध्याकालीनमेघः । यथा, रघुः । १२ । २८ ।

“सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः ॥”)

सन्ध्यारागं, क्ली, (सन्ध्याया राग इव रागो यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ (यथा, आर्य्यासप्तशत्याम् । ३९२ ।

“प्राचीरान्तरितयं प्रियस्य वदनेऽधरं समर्पयति ।
प्राग्गिरिपिहिता रात्रिः सन्ध्यारागं दिनस्येव ॥”)

सन्ध्यारामः, (सन्ध्यायां रामो रमणं यस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥

सन्नः, पुं, (सद + क्तः ।) पियालवृक्षः । इत्यमरटीकायां भरतः ॥ अवसन्ने, त्रि ॥ (यथा, रामायणे । ६ । ११२ । ८७ ।

“कश्मलाभिहिता सन्ना बभौ सा रावणोरसि ॥”

सन्नकः, पुं, (सीदतीति । सद + क्तः । ततः स्वार्थे कन् ।) खर्व्वः । इति सन्नकद्रुशब्दटीकायां भरतः ॥

सन्नकद्रुः, पुं, पियालवृक्षः । इत्यमरः ॥ “सन्नकः खर्व्वो द्रुः स्कन्धोऽस्येति सन्नकद्रुरिति स्वामी । सन्नको द्रुश्चेति द्वे नामनी इति सोमनन्दी । इति भरतः ॥

सन्नतिः, स्त्री, (सं + नम + क्तिन् ।) प्रणतिः । (यथा, भागवते । १० । ७० । २४ ।

“ये च दिग्विजये तस्य सन्नतिं न ययुर्नृपाः ।
प्रसह्य रुद्धास्ते नासन्नयुते द्वे गिरिव्रजे ॥”)

ध्वनिः । इति मेदिनी ॥ नम्रता यथा, हरिवंशे ।